International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2025; 2(3): 57-62
© 2025 IJMH
www.themultijournal.com
Received: 20-06-2025
Accepted: 26-06-2025
Publish : 27-06-2025

**डॉ. पिताम्बरमिश्रः**
संविदाध्यापकः,
नव्यन्यायविभागः,
केन्द्रियसंस्कृतविश्वविद्यालयः,
श्री सदाशिवपरिसरः, पुरी

**Correspondence:**
**डॉ. पिताम्बरमिश्रः**
संविदाध्यापकः,
नव्यन्यायविभागः,
केन्द्रियसंस्कृतविश्वविद्यालयः,
श्री सदाशिवपरिसरः, पुरी

# न्यायनये प्रमेयपदार्थानां विवेचनम्

**डॉ. पिताम्बरमिश्रः**

भारतीयानां धर्माधर्मकाममोक्षभेदेन पुरुषार्थचतुष्टयम्। साक्षात् परम्पराया वा पुरुषार्थापकारकाणि विद्यास्थानानि। विद्यास्थानानि चतुर्दश । तथाहि -

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश** ।। इति।

अस्मिन् संसारे चतुर्विधाः पुरुष विद्यन्ते अक्ष-सन्दिग्ध-विपर्यय निश्चितमिति भेदेन अप्रतिपन्नप्रतिपन्न-सन्दिग्ध विपर्ययस्तभेदेन वा। तत्र निश्चितमतिरेव मुनिपदवाच्यः शास्त्रेणाज्ञस्य ज्ञानमुपजनयति, संशयानस्य संशयमुपहन्ति, विपर्यस्यतो विपर्यासं व्युदस्यतीति जयन्तभट्टमतं जगति प्रसिद्धम्।

सकलदर्शनापेक्षया वैशेषिकदर्शनं प्राचीनम्, तथैव न्यायदर्शनमपि। तकीः प्रमाणादिषोडशपदार्थाः। तथा च सूत्रं प्रमाणप्रमेयसंशयप्रयोजन दृष्टान्त सिद्धान्तावयवतर्कर्णियवादजल्पवितच्छाहेत्वाभास-च्छलणातिनिग्रहस्थानानां तत्त्वज्ञानान्निः श्रेयसाधिगम् इति न्यायस्य प्रथमं सूत्रम् इति परमकारुणिको भगवान् मुनिः अक्षपाद्गौतम सूत्रयत्। तथा च प्रतिपादितं मणिकारेण श्रीमता गङ्गेशोपाध्यायेन तत्त्वचिन्तामणिग्रन्थस्य प्रमाण्यवादप्रकरणे - "अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्या-स्थानेषु अभ्यार्हिततमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनायः[१]। तत्र अन्वीक्षिकीशास्त्रं न्यायशास्त्रम्। अनुमानश्चान्वीक्षा, प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा। तया प्रवर्त्तते इयं न्याय-विद्या इति आन्वीक्षिकीव्यपदेशो भवति। न्यायप्रयोज्यानुमानं परार्थानुमानं न्यायशब्देनोच्यते नीयते विवक्षितार्थसिद्धिरनेनेति व्युत्पत्तेः। प्रतिज्ञाद्यवयवपञ्चासमुदायात्मके न्याये प्रत्यक्षादीनां न्यायाभि-मतानां चतुर्णामपि प्रमाणानां संसर्गः विद्यते। तत्र प्रतिज्ञावाक्येन सह आगमस्य, हेतुवाक्येन सह अनुमानस्य, उदाहरणेन सह प्रत्यक्षस्य, उपनयवाक्येन सह उपमानस्य च सम्बन्धोऽस्ति। समेषां प्रतिज्ञा-दिवाक्यानामेकार्थसमवाये सामर्थ्यप्रदर्शनं निगमनम्।

न्यायश्च विप्रतिपन्नपुरुषप्रतिपादक इति तस्य महान् उत्कर्षः। सर्वोपजीव्यं न्यायं सपरिकरं व्युत्पादयदिदं न्यायविस्ताराख्यं शास्त्रं अष्टादशविद्यास्थानेषु आदिमं स्थानमारोहोति।

**"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तारः।**
**धर्मशास्त्रं पुराणश्च विद्या ह्योताश्चतुर्दश ।।**
**आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः ।**
**अर्थशास्त्रं च विज्ञेयं विद्या ह्यष्टदशैव तु ।।"**

आसु अष्टादशविद्यासु न्यायविद्यायाः प्राथम्यमस्तीत्यत्र प्रमाणं प्रदर्शयति अर्थशास्त्रकारः कौटिल्यः -

**"प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम्।**
**आश्रयः सर्वधर्माणां विद्योद्देशे प्रकीर्त्तिता ।।"**

अर्थात् वेदप्रामाण्यहेतुत्वात् समेषां विद्यास्थानानां मूलभूतां आन्वीक्षिकी भवति। सर्वाऽपि विद्या न्यायविद्याप्रतिपाद्यं प्रमाणाद्युपजीव्य स्वे स्वे व्युत्पाद्यो अर्थतत्वे प्रवर्त्तते। न्यायविद्या तु प्रमाणादिकं व्युत्पादयन्ती। ईश्वरस्य प्रत्यक्षप्रमाणेऽन्तर्भवति। अतः "मन्त्रायुर्वेदप्रामाण्यकच्च तत्प्रामाण्यमाप्त-प्रामाण्यात्[२] इति न्यायसूत्रम्। तन्मे प्रमाणं शिवः" इति न्यायाचार्याणामुक्तिश्च सङ्गच्छते। सर्वज्ञेश्वरस्य

प्रमाणत्वं प्रतितन्त्रसिद्धान्तः। वेदकर्तृत्वेन ईश्वरं साधयितुमेव महता परिश्रमेण भगवता गौतमेन शब्दस्यानित्यत्वं व्यवस्थापितम्। "आदित्यो वै युपः" इति श्रुतिः यूपस्य आदित्यतां न प्रतिपादयति अपि च। आन्वीक्षिकीपरिशोधितप्रमाणादिप्रकाशितमादित्यसदृशतां तेजस्वितां बोधयति इति इतरविद्या अपि स्वप्रतिपाद्यविषये आन्वीक्षिकीमपपेक्ष्यन्ते इत्यतः विद्यते न्यायशास्त्रस्य प्राधान्यम्।

आत्मशरीरेन्द्रयार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गाःप्रमेयम् इति। तत्र आत्मत्वसामान्यवानात्मा। स च नित्योविभुश्च बुद्ध्यादिगुणलिङ्गादनुमेय। तथा हि बुद्ध्यादयो विशेषगुणाः, अनित्यत्वे सत्येकेन्द्रियग्राह्युत्वाद् रूपादिवत्। रूपत्वे व्यभिचार-वारणायानित्यत्वे सति, घटेऽतिव्याप्तिवारणायैकेति। न च पृथिव्यप्ते-नोवाच्वाकाशगुणाः, मानसप्रत्यक्षरूपत्वात्।[३] न च चिक्कालमनो-गुणाः, विशेगुणत्वात्। गुणश्च गुण्याश्रिता इति परिशेषाज्ज्ञदाश्रय आत्मेति। स चात्मा द्विविधः। जीवात्मा परमात्मा चेति। जीवात्मनस्त्वस्मदादयोऽनन्ता एवेति। परमात्मा तु ईश्वरः एक एव, स च सर्वज्ञः।

शरीरम् - भोगायतनमन्त्यवयवि शरीरम्। यदवच्छेदेनात्मनि भोगो जायते तद्भोगायतनम्। भोगस्तु सुखदुःखसाक्षात्कारः। अथवा "चैष्टेन्द्रियार्थश्रयः शरीरम्"[३] चेष्ठ्या प्रवृतेर्वा सुखदुःखादिभोगानां च यः आश्रयः तच्छरीरमिति। अत्र सूत्रे नियोजितार्थपदेन गन्धादिग्रहणे तु भोग्यानां गन्धादीनां भोगाधिष्ठानत्वसम्बन्धेन शरीरवृत्तित्व विज्ञेयम्। अतः आत्मनः भोगाधिष्ठानं शरीरमिति। तथा च ईप्सितपदार्थमधिकृत्य तादृशपदार्थस्येप्साजिहासाभ्यां प्रेरितस्य आत्मनः पदार्थप्राप्तिपरित्यागोपायानुष्ठानस्वरूपा समीहाशब्दवाच्या चेष्टा, आत्मनः यत्र प्रवर्त्तते तच्छरीरमिति। अतः चेष्टाश्रयः शरीरमिति सिद्धम्, शरीरे स्थितस्यैव आत्मनः चेष्टासम्भवात् पुनश्च इन्द्रियाश्रयत्वम् शरीरत्वम्। तथाहि - यस्य शरीरस्य स्वविषयेषु रूपादिषु पुरुषादिषु ज्ञेयानां साधुत्वम्, यथा भगवत्प्रतिमारूपस्य, अज्ञेयामसाधुत्वं यथा- आगम्यास्तनादिरूपस्य प्रवर्त्तन्ते इन्द्रियाणि, एषामिन्द्रियाणां शरीरोपकारादि नैव शरीरस्य इन्द्रियाश्रयत्व-मित्याश्रयः। तथा च बार्तिकम् - "शरीरानुविधानमिन्द्रियाश्रयत्वं बृमो न पुनराधारधेयभावेन इन्द्रियाणि शरीरे वर्त्तन्ते इति एवं च यस्यानुगृहितानि अपघाते च अपहृतानि, स्वविषयेषु साध्यसाधुषु वर्त्तन्ते स एषमाश्रयः शरीरम्[४] तथा च इन्द्रियाथार्सन्दि-कर्षादुत्पन्नयोः सुखदुःखयोः प्रतिसम्वेदनं प्रवर्त्तते स एव प्रवृत्याश्रयः एषामर्थानामाश्रयः तच्छरीरम्।

प्रमेयस्यात्मशरीरेन्द्रिस्वरूपस्य द्रव्ये, अर्थस्य गन्धरसरूपस्पर्श शब्दस्वरूपस्य गुणे, बुद्धेगुणे मनसो द्रव्ये, प्रवृत्तेगुणे, दोषाणामिच्छाद्वेषमिथ्याज्ञानस्वरूपानां रागद्वेषमोहपदप्रतिपाद्यानां गुणे, प्रेत्यमृत्वा भावो जननमिति व्युत्पत्या मरणोत्तरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमित्तं, चरमप्राणशरीरसंयोगध्वंसो मरणं, आद्यशारीरप्राणसंयोगो जन्म, तथा च मरणान्तरं तादृशसंयोगरूपस्य तस्य गुणे, सुखदुःखसंवेदनस्वरूपस्य मुख्यफलस्य गुणे, गौणमुख्य-साधारणजन्यमात्रस्वरूपफलस्यापि द्रव्यादिषु, पीडालक्षणस्य दुःखस्य गुणे अन्तर्भावः। अपवर्गस्तु आन्त्यन्तिकी दुःखनिवृत्तिः। दुःखानि, शरीरं षड् इन्द्रियाणि षट् विषयाः षड्बुद्धयः सुखं दुःखं च एकविंशतिः।

इन्द्रियम् - शरीरसंयुक्तं ज्ञानकारणमतीन्द्रियमिन्द्रियम्। आत्मन्यतिव्याप्तिवारणायातीन्द्रियेति। आत्मा तु मनोरसेन्द्रियग्राह्यः। कालादावतिव्याप्तिवारणाय ज्ञानकारणेति। निर्विकल्पकेऽतिव्याप्ति-वारणाय शरीरसंयुक्तमिति। अर्थो द्विविधः भावाभावभेदात्। भावाः षडेव पदार्थाः। ते च द्रव्यगुणकर्मसामान्यसमवायाख्याः। द्रव्यत्व-सामान्यवद् द्रव्यं, गुणाश्रयो वेति। तत्र द्रव्याणि पृथिव्याप्ते-जोवाट्वाकाशकालदिगात्ममनासिं नवैव। तत्र पृथिवीत्वसामान्यवती पृथिवी। सा च नित्यानित्यभेदात् द्विविधा। नित्या परमाणुरूपा, अनित्या कार्यरूपा। सा पुनस्त्रिविधा, शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनां प्रत्यक्षसिद्धम्। तच्च द्विविधम्। योनिजमयोनिजं द्विविधम्, जरायुजाण्डजभेदात्। जरायुजं (मनुष्यपशुनां) मनुष्य-पश्वादीनां, जरायुशब्देन वेष्टनचर्मीच्यते। अण्डजं पक्षिसर्पादीनाम्। अयोनिजमपि द्विविधम्। स्वेदजोद्भिजादिभेदात्। स्वेदजं कृमिकीट-मशकादीनाम्। उद्भिज्जन्तु वृक्षलतादीनामिति। इन्द्रियं घ्रणरसन-चक्षुश्रोत्रत्वङ्मनांसीति भेदात् षड्विधम्। इन्द्रियं गन्धग्राहकं घ्रणं नासाग्रवर्ति। रसग्राहकमिन्द्रियं रसनम्। तच्च जिह्वाग्रवर्ति। रूपग्राहकमिन्द्रियं चक्षुः। तच्च कृष्णताराग्रवर्ति। शब्दग्राहकमिन्द्रियं श्रोत्रम्। तच्च कर्णशष्कुल्यवच्छिन्नं नमः। स्पर्शग्राहकमिन्द्रियं त्वक् सम्पूर्णशरीरवर्ति। विषयो मृत्पावाणादिरिति।

तथा च आत्मनः भोगसाधनानि इन्द्रियाणि, तद्यथा "घ्रणरसन-चक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः"[५] एतानि पञ्चेन्द्रियाणि पञ्च-महाभूतेभ्यः उत्पन्नं भवति। एतानि इन्द्रियाणि साक्षाद्ज्ञान-साधनानि भवन्ति। यथा - आत्मा येन गन्धं गृह्णाति तत् घ्रणेन्द्रियम्। येन रसं गृह्णाति तत् रसनम्। येन रूपं गृह्णाति तत् चक्षुः। येन स्पर्शमनुभवति तत् त्वक्, येन शब्दं गृह्णाति तत् श्रोत्रम्। सर्वाणि इन्द्रियाणि न एकप्रकृतिकानि अर्थात् न एकभूतोत्पन्नानि इति। यदि पञ्चेन्द्रियाणि एकभौतिकानि स्युः तदा सर्वेषाम् इन्द्रियाणां सर्वगुणग्राहकत्वमापद्येत। परन्तु तथा न भवति। तस्मात् भिन्नभिन्नोत्पन्नानि इन्द्रियाणि। घ्रणं पार्थिवं गन्धग्राहकत्वात्, नयनं तैजसं रूपग्राहकत्वात्। रसनं जलीयं रसग्राहकत्वात्, त्वक् वायवीयं स्पर्शग्राहकत्वात्। श्रोत्रम् आकाशं शब्दग्राहकत्वात् इति भेदेन दर्शितम्।

अर्थः - अर्थत्तु इन्द्रियाणां विषयः। अर्थाः षट्पदार्थाः। ते च द्रव्यगुणकर्मसामान्यविशेषसमावायाः[६] प्रमाणादयो यद्यप्यत्रै-वान्तर्भवन्ति तथापि प्रयोजनवशाद् भेदेन विवक्षितम्। तत्र समवायिकारणं द्रव्यम्। गुणाश्रयो वा। तानि च द्रव्याणि पृथिव्याप्तेजोवाद्वाकाशकालदिगात्ममनासिं नवैव। एतस्य अर्थस्य तत्त्वज्ञानं हि मोक्षं प्रति कारणं भवति, इन्द्रियाणां विषयत्वात्। गन्धरूपरसस्पर्शशब्दाः पृथिव्यादिगुणाः तु इन्द्रियाणामर्थाः। तथाहि

"गन्धरूपरसस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः[७] अत्र गन्धः पृथिव्याः विशेषगुणः, रसः जलस्य विशेषगुणः, रूपं तेजसो विशेषगुणः, स्पर्शः वायोः विशेषगुणः, शब्दः आकाशस्य विशेषगुणः इति। संसारेऽस्मिन् बहुनाम् अर्थानां सत्त्वेऽपि एतेषां पञ्चानां (अर्थानां) सम्यग्ज्ञानात् मोक्षप्राप्तिर्भवति इति नैयायिकानां सिद्धान्तः।

बुद्धिः - सांख्यमते पुरुषः खलु निर्गुणे निष्क्रियश्च। अतः बुद्धि र्न पुरुषस्य गुणः। सा च बुद्धिः प्रकृते परिणामविशेषः, आत्मनो निर्गुणनिष्क्रियत्वात्। अतः बुद्धिस्तु निश्चयात्मकान्तः कारणवृत्तिरिति तेषामाशयः। परन्तु नैयायिकानां मते बुद्धिस्तु न तावत् तादृशी अपितु सा आत्मनः गुणः - विशेषः। सा आत्ममनरिन्द्रियसंयोगात् उत्पद्यते तदेव ज्ञानमिच्युच्यते। तदुक्तं गौतमेन - "बुद्धिरूपलब्धिज्ञानमित्यनर्थान्तरम्"[८] तथा च - "सर्वेषां व्यवहाराणां कारणभूतो साधनभूतो वा गुणो बुद्धिः। सर्वव्यवहारेहेतुर्गुणबुद्धिज्ञानम्।[१०] बुद्धिर्नामोपलब्धिः, स तु सर्वेषां व्यवहाराणाम् असाधारणकारणभूतो गुणः अत्र कालादौ गुणत्वाभावात् तथा च रूपीदीनां सर्वव्यवहाराभावात् तत्र तत्र नाति व्याप्तिः।

तर्कभाषाकारेण केशवमिश्रेण बुद्धिः लक्षणावसरे उक्तं यत् - बुद्धिरुपलब्धिज्ञानं प्रत्यय इत्यादिभिः पर्यायशब्दैर्थाऽभिधीयते सा बुद्धिः। अर्थप्रकाशो वा बुद्धिः। सा च संक्षेपतो द्विविधा। अनुभवः स्मरणं च। अनुभवोऽपि द्विविधो, यथार्थोऽयथार्थश्चेति। तत्र यथार्थोऽर्थाऽविसंवादी। स च प्रत्यक्षादिप्रमाणैर्जन्यते। यथा - चक्षुरादिभिरदुष्टैर्घटादिज्ञानम्। धूमलिङ्गकमग्निज्ञानम्। गोसादृश्य दर्शनाद् गुवयशब्दवाच्यताज्ञानम्। "ज्योतिष्टमेन स्वर्गकामो यजेत" इत्यादि वाक्काज्ज्योतिण्टोमस्य स्वर्गसाधनताज्ञानं भवति।[७]

अयथार्थस्तु अर्थव्यभिचारी, अप्रमाण्यम्। स त्रिविधः। संशय-स्तर्क-विपर्ययश्चेति। संशयस्तु स्तर्क वक्ष्येते। विपर्ययस्तु अतस्मिंस्तद्ग्रहः। भ्रम इति यावत्। यथा पुरोवर्तिन्यरजते शुक्तिकादौ रजतारोपः, "इदं रजतम्" इति।

ख्यातिपञ्चकानुसारेण भ्रमज्ञानं अथवा विपर्ययज्ञानस्य विश्लेषण दार्शनिकैः द्विधा रित्या व्यवस्थापितम्। अतः परिणाम-स्वरूपतः मुख्यरूपेण पञ्चख्यातिः प्रसिद्धः।

**आत्मख्यातिरसत्ख्यातिरख्यातिः ख्यातिरन्यथा ।**
**तथानिर्वचनीयख्यातिरित्येतत् ख्यातिपञ्चकम् ।।**

अत्र बौद्धाः आत्मख्याति तथा असत्ख्याति मन्यन्ते। "असत्ख्याति" शुन्यवादीनः माध्यमिक बौद्धाः मामनन्ति। प्राभाकरणां मतेषु अव्यातिः, अव्यातिशब्दस्योऽर्थ भवति ज्ञानस्याभाव अर्थात् भेदाग्रहः। अनिर्वचनीय ख्यातिः वेदान्तिनो स्वीकुर्वन्ति। पञ्चमे नैयायिकाः अन्यथाख्यातिवादरूपेण स्वीकरोति।

ज्ञानं बुद्धिर्वा यथा जीवात्मनि तथैव परमात्मन्यपि वर्त्तते। "ज्ञानाधिकरत्वमेवात्मा" इति आत्मनः लक्षणम्। यदि एतादृशलक्षणं क्रियते चेत् द्रव्यं गुणस्य, क्रिया क्रियावतः समावायात् भवति आत्मा ज्ञानस्य समवायिकारणम्। ज्ञानमनित्यमिति नैयायिकानां सिद्धान्तः। अपि च तत् अनेकं परतः प्रकाश्यं च। तस्य (ज्ञानस्य) प्रथमक्षणे उत्पत्ति, द्वितीयक्षणे स्थितिः, तृतीयक्षणे विनाशः इत्यतः तत् अनित्यम्। विषयभेदेन ज्ञानस्य भेदात् बहुत्वम्। यथा - इन्द्रियं घटादीन् प्रकाशयति, तस्य स्वप्रकाशाभावात् तथा विषयान्नपि ज्ञानं प्रकाशयति। परमात्मज्ञानमेकं तथा च स्वप्रकाशकम्। तस्य ज्ञानस्य सर्वदा विद्यमानत्वात्। विषयाणां भेदेऽपि तस्य भेदाभावात् एकत्वम्। परमात्मज्ञानं स्वतः प्रकाशमानत्वात् स्वप्रकाशत्वम्।

ज्ञानं द्विविधम्, स्मृत्यनुभवभेदात्। तथा हि कारिकावल्याम् "बुद्धिस्तु द्विविधा मता। अनुभुतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा[८] इति। एतत्र जीवात्मविषयकम्, परमात्मनि स्मृत्यनुभवाभावात्। अनुभवजन्याज्ञानं स्मृतिः। तस्मात् अनुभवजन्यत्वात् सा अनित्यम्। एवं च अनित्यत्वात् परमात्मनि अविद्यमाना।

अनुभवः - यथार्थायथार्थभेदेन अनुभवः द्विविधः। तत्र यथार्थानुभवः प्रमा, अयथार्थानुभवः अप्रमा। उक्तं च कारिकावल्याम् "अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते[९] इति। यथार्थानुभवः - "तद्वति तत्प्रकारकानुभवः यथार्थानुभवः"[१०] अर्थात् यद्वस्तु यद्धर्मविशिष्टं, तत् यदि तत्प्रकारकत्वेन अनुभूयते प्रकाश्यते वा तर्हि तद्यथार्थानुभवः इत्युच्यते। यथा- घटत्वविशिष्ट घटे घटत्वप्रकारकः अयं घटः इत्यनुभवः। तथाहि चिन्तामणौ - "यत्र यदस्ति तत्र तस्यानुभवः प्रमा"[११] इति स यथार्थानुभवः तत्वानुभवः इति कथ्यते। स च चतुर्विधः प्रत्यक्षानुमित्युपमितिशब्दभेदात्। तथाहि कारिकावल्याम् - "प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दने[१२] इति।

अयथार्थानुभवः -

"तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थानुभवः"[१३] इति। अर्थात् यत्र यत्प्रकारताविशिष्टधर्मः न विद्यते, तत्र तत्प्रकारकोऽभवोऽयथार्थानुभवः इति। अप्रमा भ्रमो वेति तस्य नामान्तरम्। तथाहि तत्त्वचिन्तामणौ - "यत्र यन्नास्ति तत्र तस्य ज्ञानं तदभाववति तत्प्रकारकज्ञानमप्रमा"[१४]। यथा शुक्तौ इदं रजतम्, इति ज्ञानम्, रजतत्वभाववत्यां शुक्तौ रजतत्वप्रकारकज्ञानात्। स च संशयविपर्ययतर्कभेदात् त्रिविधः।

स्मृतिः - अनुभवजन्यज्ञानं स्मृतिः। अनुभवभेदात् स्मृतेरपि भेदद्वयमस्ति। यथार्थस्मृतिः अयथार्थस्मृतिश्च। तथा हि- "यथार्थानुभवाज्जन्यते यत् तद्यथार्थस्मृतिः[१५] अयथार्थात् जन्यते यत्तदयथार्थस्मृतिः इति। कार्यस्य कारणगुणपूर्वकत्वात् स्मृतेः अनुभवकार्यत्वात् अनुभवः यथा भवति, तज्जन्यस्मृतिरपि तथैव भवति।

मनः - आत्मनः सुखदुःखादिसाक्षात्कारे यत्साधनं तन्मन इति। तथाहि "साक्षात्कारे सुखादीनां कारणं मनः उच्यते।[१६] तथा च

सुखादिसाक्षात्कारकरणत्वे सति इन्द्रियत्वं मनसः लक्षणम्। ज्ञानं प्रति इन्द्रियं भवति कारणम्। यदा तु आत्मा मनसा संयुज्यते। मनः इन्द्रियेण, इन्द्रियं च अर्थेन तदा बाह्यप्रत्यक्षज्ञानं भवति। अतः प्रत्यक्षस्यापि मनो लिङ्गम्। एवं च यदा आत्ममनसोः संयोगः भवति, तदा आन्तरिकप्रत्यक्षविषयकं ज्ञानं भवति। तथा च स्मृतिज्ञानं प्रति आत्ममनःसंयोगस्यापि आवश्यकता अपेक्षते, अतः स्मृतेरपि मनो लिङ्गम्। एवं च अनुमानं प्रति व्याप्तिस्मरणं कारणम्। व्याप्तिस्मरणं तु मनो विना नोत्पद्यते अतोऽनुमानस्यापि मनो लिङ्गम्। सादृश्यज्ञानं विना उपमानं नोत्पद्यते सादृश्यज्ञानमपि मनो विना न स्यात्। अतो उपमानस्यापि मनो लिङ्गम्। शब्दप्रमाणं तु शक्तिग्रहस्मरणापेक्ष्यं, तदपि मनो विना नोत्पद्यते। अतः शब्दस्यापि मनोलिङ्गम्। तथा च स्थाणुर्वा पुरुषो वा इति संशयं प्रति स्थाणुपुरुषयोः समानधर्मणां स्मृतिरेव कारणं, तत्तु मनो विना नोत्पद्यते, अतः संशयस्यापि मनो लिङ्गम्। एकस्मात् कारणात् स्मृतेः साक्षात् मनःसाधकत्वम्।

तच्च मनः सर्वेषामिन्द्रियाणां स्वस्वविषयं प्रति प्रेरकम्। "स्पर्शरहितत्वे सति क्रियाक्त्वं मनसः लक्षणम्"[१७] इति। पृथिवीजलतेजोवायुषु क्रियावत्वे सति स्पर्शत्वात् तत्र तत्र नातिव्याप्तिः। तथा च आत्मनि स्पर्शरहितत्वे सति क्रियावत्वाभावात्, तत्रापि नातिव्याप्तिः। मनसि वर्त्तन्ते अष्टौ गुणाः। ते यथा संख्या, परिमाणम्, पथकत्वम्, संयोगपरत्वम्, अपरत्वम् वेगश्च। तदुक्तं मुक्तावल्याम् - "परापरत्वे संख्यादयाः पञ्चवेगाश्च मानसे ।[१८]

इन्द्रियाणि यथा अतीन्द्रियाणि, तथा मनोऽपि। यथा च रूपग्राहकत्वात् चक्षुरिन्द्रियम्। तथा च - सुखदुःखादिग्राहकत्वात् मनोऽपि इन्द्रियमित्यनुमानेनैव सिद्धं भवति। तथा च "सुखदुःखाद्युपलब्धिसाधनमिन्द्रियं मनः"[१९] इति अन्नभट्टपादाः अर्थात् सुखाद्युपलब्धिसाधनत्वे सति इन्द्रियत्वं मनसः लक्षणम्। अतः चक्षुरादीनामिन्द्रियत्वे सति सुखदुःखाद्युपलब्धिसाधनाभावात् तत्र नााितव्याप्तिः। एवं च आत्मनः उपलब्धिसाधनत्वेऽपि इन्द्रियत्वाऽ-भावात् तत्र (आत्मनि) नातिव्याप्तिः।

मनः प्रतिशरीरं भिन्नम्। तथाहि दीपिकायाम् - आत्मनश्च प्रतिशरीरं भिन्नत्वेन अनन्तत्वात् तन्निष्ठमनोऽपि अनन्तम्।[२०] अतः शरीरभिन्नत्वात् मनसः बहुत्वं सिध्यति।

मनः अणु, चाक्षुषादिप्रत्यक्षज्ञानानाम् एककालोत्पत्रिकत्वा-भावात्। उक्तं च कारिकावल्याम् - "अयौगपद्याज्ज्ञानानां तस्याऽ-णुत्वमिहेष्यते"[२१] मनो यदि विभुः स्यात् तर्हि इन्द्रियेण सह मनसः युगपत् संयोगसत्वात् योगपद्यज्ञानं स्यादेव। परन्तु ज्ञानं न यौगपद्यम्, मनसः तदयौगपद्यं भवति अणुत्वात्। तथा च यदा येन इन्द्रियेण सह संयोगो भवति तदा आत्मनि तदिन्द्रिय-ग्राह्यज्ञानमुत्पद्यते। एततु मनसः अणुत्वादेव भवति। मध्यमपरिमाणः अनित्यः, अतः मनसि मध्यमपरिमाणः नास्ति। तस्य विनाशाभावात्, निश्वयवत्वाच्च नित्यत्वम्। मनसः विभुत्वं स्पर्शरहितत्वात् आकाशवत् इति चेन्न। ज्ञानं प्रति आत्मा समवयिकारणम्। आत्ममनसोः संयोगः असमवायिकारणम्। मनो न विभुः अपितु अणु, अथवा मनसः विभुत्वकल्पनेन सह वास्तविकविभोः आत्मनः संयोगानभ्युपगमात्। तथाहि संयोगः कर्मजन्यः मनश्चेत् विभुः स्यात् तत् कर्म नोत्पद्यते। विना च कर्मं मनः आत्मना सह कथं वा संयुज्यते, येन संयोगेन आत्मनि ज्ञानं संजायते। यतो हि आत्ममनसोः संयोगे सत्येव ज्ञानमुत्पद्यते। अतः मनसः अणुत्वं सिद्धम्।

प्रवृत्तिः - वाग्बुद्धिशरीराणां क्रिया प्रवृत्तिपादेन व्यपदिश्यते। तदुक्तं सूत्रकारेण सूत्रितम् - "प्रवृत्तिर्वाग्बुद्धिशरीरारम्भः"[२२] प्रवृत्तिं प्रति चत्वारि कारणानि सन्ति। तानि तु विकीर्णा, कृतिसाध्यताख्यज्ञानम् इष्टसाधनताज्ञानम्, उपादानसमवायिकारणस्य प्रत्यक्षं चेति, तदुक्तं कारिकावल्याम् - "चिकीर्षा कृतिसाध्येष्टसाधनत्वमतिस्तथा। उपादानस्य चाध्यक्षं प्रवृत्तौ जनकं भवेत्।[२३] एतादृशकारणचतुष्टयस्य सत्वे कार्यं प्रति प्रवृत्तिर्भवति। असत्वे अभावे वा प्रवृत्तिर्न भवति। तथा च कृतिसाध्यताज्ञानाज्ञानाभावात् चन्द्रानयने, इष्टसाधन-ताज्ञानाभावात् अग्निप्रवेशे परमाणुप्रत्यक्षाऽभावात् द्व्यणुकोत्पादने न प्रवृत्तिः। किन्तु तादृशकारणचतुष्टयस्य सत्वात् "घटोत्पादने" कुलालस्य प्रवृत्तिर्भवति। तत्प्रवृत्याख्य प्रमेयज्ञानं तु मोक्षं प्रति कारणम्।

दोषः - "प्रवर्त्तनालक्षा दोषाः" अर्थात् प्रवर्त्तकत्वमेव लक्षणं येषां ते प्रवर्त्तनालक्षणा दोषाः। दोषप्रयुक्तौ हि पुरुषः पुण्ये पापे वा कर्मणि प्रवर्त्तते। दोषाः खलु पापपुण्यकर्मणोः कारणम्। ते तु पुमांसं धर्माधर्मविहितकर्मणि प्रवर्त्तयन्ति इति प्रवर्त्तनालक्षणे दोषाः इति सिद्धम्।

स दोषः रागद्वेषमोहभेदेन त्रिविधः।

रागः - आत्मनः अनुकूलेष्यर्थेषु रागः। सः रागः काममत्सर-स्पृहातृष्णालोभभेदेन पञ्चविधः। तत्र स्त्रीसंभोगेच्छा कामः। यदन्यस्मै निवेद्यमानमपि वस्तु धनवन्नक्षीयते तदपरित्यागेच्छा परोत्कर्षासहनी दृष्टिर्वा मत्सरः। अनात्मीयवस्तुग्रहणेच्छा स्पृहा। बुनर्भवप्रतिसन्धानहेतुभूतेच्छा अत्यधिकासक्तिपूर्णेच्छा वा तृष्णा। निषिद्धद्रव्यस्य परद्रव्यस्य वा ग्रहणेच्छा लोभः।

द्वेषः - प्रतिकूलेषु अर्थेषु द्वेषः। सः पञ्चविधः। क्रोधः, ईर्ष्या, असूया, द्राहः, अमर्षश्च। तत्र अक्षिभ्वादिविकारहेतुः प्रज्वलनात्मकः क्रोधः। ईर्ष्यानाम अपरस्य साधारणवस्तुनां दर्शनाद्यसहनम्। परगुणेष्वक्षमा असूया। परोपकारो द्रोहः। अदर्शितमुखादिविकारः परं प्रति मन्युः अमर्षः इति।

मोहः - वस्तुपरमार्थापरिच्छेदमिथ्यावसायो मोहः। सः चतुर्विधः तद्यथा - मिथ्याज्ञानम्, विचिकित्सा मानः, प्रमादश्च। तत्र अतस्मिन् तद्बुद्धिः मिथ्याज्ञानम्। यथा - शुक्तौ रजतमिति। किंस्विदिति

विमर्शी विचिकित्सा। सन्देह इत्यर्थः। असद्‌गुणाध्यारोपेण स्वोत्कर्ष-बुद्धिर्मानः। कियदेतदित्यवज्ञया कर्त्तव्याकरणं प्रमादः।

इमे दोषाः संसारहेतवः। एते खलु मिथ्याज्ञाननिमित्ताः। सम्यगनाने उदेति एतेषां दोषाणां निवृत्तिः। यथा च न्यायमञ्जर्य्याम् उक्तम् -

**"संसारकाराभवनप्रवेशमार्गास्त एते त्रय एव दोषाः**

**एषां प्रहाणोद्यममादधानो न न जन्ममृत्यू पुनरभ्युपैति ।।**

प्रेत्यभावः- "पुनरुत्पत्तिः प्रेत्यभावः"[२४] जीवात्मनो शरीरवियोगात्म-कपुनरुत्पत्तिः प्रेत्यभावः। उक्तं च भाष्ये - "उत्पन्नस्य क्वचित्स-त्वानिकाये मृत्वा या पुनरुत्पत्तिः स प्रेत्यभाव"[२५]। अत्र सूत्रे पुनरुत्पत्तिपदेन उत्पद्यते शङ्का यत् - कस्येयं पुनरुत्पत्तिः शरीरस्य आत्मनो वा ? आत्मनस्तु नास्ति नात्पद्यते। अतः स्पष्टं भवति यत् "सोऽयमात्मन एव मृत्वा पुनर्जन्म प्रेत्यभाव इति। मरणम् आत्मनो भोगायतनदेहेन्द्रियादिवि योगः, जन्म तु तत्सम्बन्धः। नित्यत्वात् तस्य आत्मनः जन्ममरणभेदोऽपि नास्ति। कर्मानुसारेण देहेन्द्रियादित्यागेपादाने एव मरणजन्मनी क्रिया पुनरोवृत्त्या कर्मानुसारेण देहेन्द्रियादिव्यागोपादाने एव मरणजन्मनी क्रिया पुनरोवृत्त्या भवन्ति प्रेत्यभाव इत्युच्यते। स एव प्रेत्यभावः संसारः। तथाहि प्रेत्यभाबो नाम पुनः देहादिभिः सह आत्मनः सम्बन्धः।

फलम् - सुखदुःखसम्बादन फलम्। धर्माधर्माभ्यां रागद्वेषादिदोषैश्च उत्पादितः सुखदुःखभोग एव फलपदार्थः। तथाहि- प्रवृत्ति-दोषजनितोऽर्थः फलम्[२६]। अतः प्रवृत्तिदोषाभ्यां जनितोऽर्थः एव फलमित्युच्यते। तत् फलं तु सुखदुःखे, ते च कर्मणा सम्पद्येते। विहितनिषिद्धभेदेन कर्मद्विविधम्। निषिधस्य तु कर्मणः सर्वस्यैव प्रायेण परलोक एव फलम्। परदाराभिमर्षणादौ हि क्रिया फलं, सुरतसुखादिसद्यः फलम्। निषिद्धविधिफलं तु नरकपतनम् पारलौकिकम्, स्वर्गवत् नरकस्यापि निरतिशयदुःखात्मनस्तदन्य-थानुपपत्ति कल्पितदेश (स्वभाव) स्य वा एतच्छरीरानुपभोग-योग्यत्वात्।[२७]

ननु कर्मकाले फलं न दृश्यते, फलकाले कमोपि कालान्तरे च फलस्य अन्यत्र प्रत्यज्ञं कारणमुपलभ्यते सेवादिकमिति चेन्न। कालान्तरे च फलस्य अन्यत्र प्रत्यक्षं कारणमुपलभ्यते सेवादिकमिति चेन्न। कर्मणां विनाशोऽपि तज्जन्यस्यात्म संस्कारस्य धर्मादेः सत्वात्, अदृष्टकल्पनाया अवष्यं भवित्वात् च। सुखदुःखादेः धर्माधर्मयोरपि अन्याश्रयत्वानुपपत्तेः, तत्सर्वमात्मनि एव वर्त्तते इति न काचित् विप्रतिपत्तिः।

दुःखम् -

"बाघनालक्षणं दुःखम्"[२८] बघना नाम पीडा। सा पीडा यस्य लक्षणं तत् दुःखम्। अतः बाघना हि दुःखस्य स्वरूपम्। तादृशम् आत्मनः प्रतीकूलवेदनीयं भवति। यतः सर्वे प्राणिनः दुःखं न इच्छन्ति। संसारस्थिताः प्राणिनः दुःखेन व्याप्ताः[२९], अतः संसारसत्वे। दुःखसत्ता, संसारभावे दुःखाभाव इति। तस्मात् दुःखपूर्णत्वात् संसारं प्रति सर्वेषां वैराग्यभावात् आविर्भवति। ततः वैराग्यात् मुक्तिर्भवति।

अपवर्गः - गौणेन मुण्येन च दुःखेन जन्मना अत्यन्तविमुक्तिः अपवर्गः। उक्तं च सूत्रकारेणः "तदत्यन्तविमोक्षोऽपवर्गः"[३०] मोक्षेऽस्मिन् संपूर्णसांसारिकदुःखानाम् अत्यन्तनिवृत्तिर्भवति। अर्थात् दुःखस्वरू-पेस्य आत्यन्तिकी निवृत्तिः अपवर्गः इत्युच्यते।

मोक्षे दुःखस्य अत्यन्तनिवृत्तिः गृहीतस्य जन्मनः हानेन अन्यस्य च अनुपादानेन भवति। एतामवस्थामनपर्यन्तामपवर्गः वेदयन्ते अपवर्ग-विदः। तदभयमजरममृत्युपदं ब्रह्मक्षेमप्राप्तिरिति।

नित्यं सुखम् आत्मनः महत्ववत् मोक्षे व्यज्यते। अभिव्यक्तेन अत्यन्तं विमुक्तः सुखी भवति इति वेदान्तिनो मन्यन्ते। तेषां प्रमाणाभावादनुपपत्तिः। न प्रत्यक्षं नानुमानं नागमो वा विद्यते "नित्यं सुखमात्मनो महत्ववन्मोक्षेऽभिज्यते। नित्यसुखस्य अभि-व्यक्तिरेव सम्बेदनम् इति यदि पूर्वपक्षिणाः कथनं तदा तस्य कारणमवश्यं वक्तव्यं, येन ज्ञानमुत्पद्यते। सुखवत् सम्बेदनमपि नित्यम्, अतः तत्कारणविषये प्रश्नो नोचित् इति तर्कस्तु न समीचीनः। यथा मुक्तः सुखेन तत् सम्बेदनेन च सन् नित्येन युक्तः तथा संसारस्थस्य मुक्तेन अविशेषात् नित्यसुखज्ञानेन युक्तः प्रसज्येत। सुखं नित्यं तस्याऽभिव्यक्तिरपि नित्या इति यदि स्वीक्रियेत तदा धर्माधर्माभ्याम् उत्पन्नयोः सुखदुःखयोः अनुभवसमये नित्यसुखस्य तज्ज्ञानस्य चापि सत्वात् उभयोः सहभावो गृह्येत। मोक्षे सुखं नित्यं, सम्बेदनम् अनित्यम् इत्यस्यापि कारणं वक्तव्यम्। आत्ममनः सयोगः न तत्र कारणं तस्य सहायकस्य कारणान्तरस्य वचनीयत्वात्। धर्मोऽपि तस्य सहायककारणं न भविष्यति, तस्यापि कारणं वक्तव्यं स्यात्। योगसमाधिधर्मस्य कारणमित्येपि न प्रलये जन्यपदार्थ-स्यासत्त्वात् तस्य धर्मस्य योगसमाधिजस्य विनाशे जाते नित्य-सुखसम्बेदनस्य निवृत्ति प्राप्नोति प्रलये मुक्तस्य नित्यसुखज्ञानं नोत्पद्यते।

प्रलयानुरोधात् कार्य्यभूतं नित्यसुखस्य सम्बेदनमपि प्रलये निवर्तेत। तत् नित्यसुखस्य असम्बेदने तस्य नित्यसुखस्य अविच्यमानताप्राप्ता। तस्य उत्पत्तिधर्मकत्वात्। नित्यत्वेनानुमातुं नैव शक्येत। नित्येच मुक्तसंसारस्थयोरेभेदः स्यात्। नित्यसुखस्य अनुभवे शरीरादिसम्बन्धः प्रतिवन्धकः इति आपत्तिरपि नैव समीचीना। शरीरादीनामुपभोगार्थत्वेन नित्यसुखसम्बेदनप्रतिवन्धकत्वं नोपप-द्येत। योगसाधनी भूतं शरीरादिकं भोगप्रतिवन्धकं कथमपि नैव सम्भाव्येत। यदि मुक्तस्य नित्यसुखसम्बेदनरूपस्य इष्टस्य प्राप्तिर्न स्यात् तदा मोक्षसाधनेषु प्रवृत्ति न स्यात्। अतः मुक्तस्य तत्प्राप्यते प्रवृत्तिरिति चेन्न अनिष्ठनिवृत्तये एव प्रवृत्ति र्नतु सुखसम्बेदनार्थम्। इष्ट प्राप्त्यर्थं प्राणिनां प्रवृत्तिः। यथा - मुक्तो यदि दृष्टम् अनित्यसुखं परित्यज्य नित्यं सुखं कामयते। तदर्थं नित्या देहेन्द्रियबुद्धयः अवश्यं कल्पयितव्याः तत्र नैव स्वीक्रियते। सुखस्य अनित्यत्वात् मुक्तस्य नित्यसुखं नैव सम्भवति। देहादीनां सुखस्य चापि अनित्यत्वं

प्रमाणसिद्धम्। स स्वराड् भवति, इत्यायमेन मुक्तस्य सुखवत्वं प्रमाणसिद्धमिति चेन्न तत्र आगमे मोक्षावस्थायां आत्यन्तिकस्य संसारदुःखाभावस्य वोधनार्थमेव मुक्तस्य सुखमुक्तम्। लोकेऽपि दुःखाभावे सुखशब्दःप्रयोगः बहुलं दृश्यते। अतएव आगमेऽपि सुखशब्दस्य दुःखाभावपरकत्वमवश्यं स्वीकार्य्यम्।

मोक्षवस्थायां प्रास्यमाणस्य नित्यसुखस्य रागेणैव मोक्षसाधनेषु प्रवृत्तिरिति चेत् तदपि नैव समीचीनम्। रागस्य बन्धनरूपत्वात् सति बन्धने मोक्षासम्भवात्, नित्यसुखरागस्य च मोक्षकालेऽपि वक्तव्यत्वात् तत्प्राप्तिं विना तद्रागनिवृत्तेरसम्भवात्। यदि च मुमुक्षोः नित्यसुखरागः नष्ट तदा मुक्तस्य नित्यं सुखं भवति। किं वा न भवति इति वक्तव्यम्। वेदान्ति मते उभयोरपि पक्षयोः मोक्षाधिगमो नोपपद्यते। यतो हि नित्यसुखाभिव्यक्तिपक्षे तु दोषाः पूर्वं प्रदर्शिता एव इति मोक्षानुपपत्तिः। नित्यसुखाभिव्यक्त्याभावः पक्षे तु वेदान्तिना मोक्षत्वं नैव स्वीक्रियते इति मोक्षानुपपत्तिः।

अपवर्गः निःश्रेयसः मोक्षो वा इति पर्य्यायवाचिनः शब्दाः। तत् खलु तत्त्वज्ञानानन्तरं न भवति। तदुक्तं महर्षिणा गौतमेन - "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापायात्रदन्तरापायापवर्गः"[३१]। सूत्रस्याभिप्रापस्त्वत्र पदार्थानां तत्त्वाज्ञानात् मिथ्याज्ञानं नश्यति। नष्टेच मिथ्याज्ञाने तत्कार्यभूतस्य दोषस्यापि नाशो भवति। दोषे च नष्टे तत्कार्यभूतप्रवृत्तिरपि नश्यति। प्रवृत्तिस्तु जन्म प्रति कारणम्। तस्मात् प्रवृत्तिर्नाशात् तत्कार्यभूतस्य जन्म अपि विनश्यति। दुःखं प्रति जन्म एव कारणं, जन्मापाये दुःखस्याप्यपायात् दुःखापायः दुःखध्वंसरूपो वा इति नैयायिकानां सिद्धान्तः।

अपवर्गो मोक्षः स चैकविंशतिभेदभिान्नस्य ध्वंसः। एकविंशतिदुःखानि तु षडिन्द्रियाणि षड्विषयाः षड्बुद्धयः शरीरं सुखं दुःखं चेति। अत्र सुखस्यापि दुःखसंवलितत्वात् सुखमपि दुःखमेव, मधुविषसम्पृक्तान्नभोजने मध्वपि विषसम्पृक्तत्वाद्विषमेवेतिवत् सुखमपि दुःखसंवलितत्वात् दुःखमेव। स पुनरपवर्गः कथमुत्पद्यत इति चेत्। अगोच्यते - शास्त्रादवगतपदार्थतत्त्वस्य विषयदोषदर्शनाद् वैराग्ययुक्तस्य ध्यानासक्तस्य मोक्षार्थिनोध्यानपरिपाकवशादेव सकलक्लेशहीनस्य निष्कामकर्मानुष्ठानाद् धर्माधर्माननुत्पादयतः पूर्वोपात्तधर्माधर्मान् योगाभ्यासवशाद् विदित्वा तत्तद्भोगयोग्यकायव्युहं विधाय तत्तद्भोगं भुञ्जानस्य प्रारब्धकर्मजन्यशरीरनाशे इति एकविंशतिदुःखात्यन्तिकदुःखध्वंसो[३२] भवति। स एव मोक्ष इति प्राचीनानां राद्धान्तः।

**सन्दर्भ ग्रन्थः**


[१] प्रा. वा.पृ.सं - ७

[२] न्या.सू.-२.१.६८

[३] मानसः प्रत्यक्षरूपत्वात्।

[४] न्या.द. - १.१.११

[५] न्या.भा. - २९ पृ

[६] न्या.द. - १.१.१२ - पृ-४८

[७] तर्कभाषा - पृ - १६८

[८] न्या.द. - १.१.१२

[९] न्या.द. १.१.१५

[१०] त.सं. पृ- ३१

[११] तर्कभाषा - पृ. १२८

[१२] न्या.मि.सू - का-५१

[१३] न्या.सि.सू - का- १२६

[१४] त.सं. - ३१ पृ.

[१५] त.चि.प्र. - पृ.- ४०१

[१६] न्या.सि.मु - ५२ का

[१७] त.सं.पृ. - ३४

[१८] त. चि.।

[१९] त.चि.,

[२०] त.सं.दी- पृ- २६

[२१] न्या.सि.मु.का ३४

[२२] त.सं.पृ-१७

[२३] त.सं.दी. - पृ-२७

[२४] न्या.द. १.१.१७।

[२५] न्या.म.पृ.७१

[२६] न्या.द. - १.१.१९

[२७] न्या.म. - पृ-७१

[२८] न्या.द. - १.१.२०

[२९] न्या.म.पृ-७५

[३०] न्या.द. - १.१.२१

[३१] न्या.द. - १.१.२२

[३२] तर्कचन्द्रिका - पृ.१६